॥ श्रीमते रामानन्दाचार्याय नमः ॥

॥ श्रीमद्गोस्वामितुलसीदासाय नमः ॥

॥ श्रीसीतारामचन्द्राभ्यां नमः ॥

नीलकण्ठ सूरि कृत

॥ रामरक्षा विवरण भाष्य ॥

This text has been prepared by
Vishal Pandey (B.Tech IIT Kanpur)
with the blessings of
Chitrakūṭa Tulasīpīṭhādhiśvara
Jagadguru Rāmānandāchārya
Śrī Svāmī Rāmabhadrāchārya

रामायणद्रुमं नौमि रामरक्षानवाङ्कुरम्।
गायत्रीबीजमाम्नायमूलं मोक्षमहाफलम्॥

अत्र रामरक्षायाः रामायणद्रुमाङ्कुरत्वं स्पष्टमवगम्यते तत्स्थानां राघवादिपदानां क्रमेण रामायणार्थसूचकत्वात् तस्याः गायत्रीबीजत्वं देवमूलत्वं चोपपादनीयम् । तेन रामायणस्यापि तदुभयं सिद्ध्यति । अत एव रामायणे चतुर्विंशतिसाहस्र्यां चतुर्विंशतिर्गायत्र्यक्षराणि वाल्मीकिना सङ्गृहीतानीत्यभियुक्तप्रसिद्धं सङ्गच्छते । तथा रामायणस्य वेदत्वोक्त्या प्रत्यक्षवेदमूलतत्त्वोपपादकम् - "वेदवेद्येपरे पुंसि जाते दशरथात्मजे । वेदः प्राचेतसादासीत्साक्षाद्रामायणात्मना॥ तस्माद् रामायणं देवि वेद एव न संशयः॥" - इत्यगस्त्यसंहितावचनम्। "स तु मेधाविनौ दृष्ट्वा वेदार्थपरिनिष्ठितौ। वेदोपबृंहणार्थाय तावग्राहयत प्रभुः॥ काव्यं रामायणं कृत्स्नं सीतायाश्चरितं महत्" इति तस्य वेदोपबृंहणप्रयोजनकत्वं प्रतिपादयदार्षवचनं च सङ्गच्छते । तत्र गायत्र्यर्थस्तावत्सवितुः ब्रह्माण्डवृक्षप्रसवभूमेः तत् प्रसवितृरूपं भूस्थानीय वरेण्यं वरणीयं मोक्षकामैर्ब्रह्माण्डवृक्ष-प्रविलापनेनानुसर्तव्यम्; एवं च, "तदिति वा एतस्य महतो भूतस्य नाम भवति"- इति श्रुतेस्तत्पदोदिते ब्रह्मणि सवितृपदेन कार्यमात्रमध्यारोप्य वरेण्यपदेन तदपोद्य निष्प्रपञ्चं ब्रह्मणः पारमार्थिकं रूपं निरूपितं तथा तस्यैव सवितुर्भर्गो भाभिर्गतिरस्येति व्युत्पत्त्या सूर्यमण्डलान्तःस्थं नारायणाख्यं ज्योतिः "य एषोन्तरादित्ये हिरण्मयः पुरुषः" इत्यादिश्रुतिप्रसिद्धं मायाविरूपमुपास्यं निर्दिष्टं धीमहीत्यनेनान्वयात् तथा देवस्येति तस्यैव ब्रह्माण्डान्तर्नानावतारैः क्रीडतो रामकृष्णादिरूपं तृतीयं रूपमुक्तं तथा धीमहीति विरोधपूर्वकं स्वार्थमुभयार्थमीश्वरार्थं चेति चतुर्धा भजनं दर्शितं तथा तृतीयपादे बहिर्मुखस्वभानायाबुद्धेः अन्तर्मुखतया प्रकर्षेण प्रेरणे प्रत्यगात्मावसाने कैवल्यरूपेऽप्यस्य हेतुत्वप्रदर्शनेन तस्यैव सकलकर्मोपास्तिफलप्रयोजकत्वमुक्तम्। एवञ्च, गायत्र्यां काण्डत्रयं दर्शितं तथा च मैत्रायणी श्रुतिः- "तत्सवितुर्वरेण्यमित्यसौ वा आदित्यः सविता स वा एवं प्रवरणीय आत्मकामेनेत्याहुर्ब्रह्मवादिनः" इति। भर्गोदेवस्य धीमहीति सविता वै देवस्ततो योऽस्य भर्गस्तं चिन्तयामीत्याहुर्ब्रह्मवादिन इति। "धियो यो नः प्रचोदयादिति बुद्धयो वै धियस्ता योऽस्माकं प्रचोदयादित्याहुर्ब्रह्मवादिनः" इति। अत्रात्मकामेन प्रवरणीय इति सवितुः प्रत्यगात्मत्वं ज्ञानकाण्डार्थ उक्तश्चिन्तयामीति चिन्तायोग्यत्वमुपासनाकाण्डार्थ उक्तः । धिय इत्यनेकाकारधीप्रेरकत्वं कर्मकाण्डार्थ उक्तः । तत्राद्य उपेयः परः सन्निकृष्टविप्रकृष्टौ तत्प्राप्त्युपायौ । एवं वेदमातुर्गायत्र्याः काण्डत्रयात्मकत्वेन तज्जानां वेदानां तन्मूलकानां रामायणादीनां च तथात्वं ज्ञेयम्। एत एवार्थाः राघवादिविंशतिनामभी रामरक्षायामवयवार्थद्वारा प्रदर्श्यन्ते।

शिरो मे राघवः पातु भालं दशरथात्मजः।
कौसल्येयो दृशौ पातु विश्वामित्रप्रियः श्रुती॥ १॥

घ्राणं पातु मखत्राता मुखं सौमित्रिवत्सलः।
जिह्वां विद्यानिधिः पातु कण्ठं भरतवंदितः॥ २॥

रङ्घति नाशं गच्छतीति रघुः व्यष्टिसमष्टिरूपोऽन्नमयः कोशस्तत्र विदितो राघवो ब्रह्माण्डाभिमानी मम ब्रह्माण्डरूपं शिरः पातु। स एव दशरथस्य दशभिरिन्द्रियाश्वैर्युक्तस्य मनोमयकोशरूपस्याऽऽत्मेवात्माकार्यं प्राणमयः कोशस्तज्जस्तेनाऽन्नमयादान्तरः प्राणमयस्ततोऽप्यान्तरो मनोमय इति पूर्वयोः प्रविलापनं सिद्धम्; स च वासनातन्तुसन्तानात्मा मनोमयो ब्रह्माण्डात् सृष्टिक्रमेणार्वाचीनं भालदेशं ब्रह्मलिपिस्थानं मे पातु। कुशलैव कौशल्या, स्वार्थे ष्यञ्, सर्वार्थावद्योतनसमर्था बुद्धिस्तस्यां भवः कौशल्येयो विज्ञानमयः, ततोऽप्यान्तरः स मम

दर्शनसाधने दृशौ पातु। एतेन मनोमयस्याप्यपवाद उक्तः। विश्वस्य मित्रं निरुपाधिप्रेमगोचरतया प्रेयानानन्दमयाख्य आत्मैव विश्वामित्रः तस्यापि प्रियः, 'सुषुप्तौ सता सोम्य तदा सम्पन्नो भवति' इति श्रुतेः प्राप्तः सन्नात्यन्तिकदुःखैकनिवृत्तिकरस्तदधिष्ठानभूत आनन्दः पुच्छब्रह्मापरपर्यायो मम श्रुती स्वधिगमद्वारभूते पातु। तदेवं प्रथमेन पादेन रामे ब्रह्माण्डमारोप्याऽन्त्यपादत्रयेणापोद्य च रामस्य शुद्धं रूपं गायत्रीप्रथमपादोक्तं दर्शितम्। अयं चार्थः कृत्स्नोऽपि वेदान्तप्रसिद्ध इति मूलवाक्यानि नोदाहृतानि। मखत्राताऽव्यभिचारेण क्रतुफलप्रदः फलमत उपपत्तेः इति न्यायादिति भावः। स मे क्रतुफलभूतदिव्यगन्धरसाद्युपलब्धिकरणं घ्राणरसनादिकं पातु। सौमित्रिवत्सलः—सुष्ठु मित्रं जीवपक्षिणः सखा ईश्वरः, तस्यापत्यं सौमित्रिर्हिरण्यगर्भः। तत्र वत्सलः तेन तत्तादात्म्यं प्राप्तानामुपासकानामनुग्रहकर्ता इत्युक्तम्। सौमित्रेर्मुख्यकार्यत्वात्तद्वत्सलो मे मुखं पातु। तावेतावन्तर्यामिसूत्रात्मानौ विद्यैकलभ्यौ न तु शुष्कतर्कगम्यौ इति विद्यावाप्तिद्वारभूतां मम जिह्वां विद्यानिधिः विद्यासम्प्रदायप्रवर्तकः पातु। विद्यापि यज्ञाद्यपूर्वप्राप्या, 'विविदिषन्ति यज्ञेन' इत्यादिश्रुतेः। अतो भरतैः कर्मठैर्वन्दितः शरणीकृतः। भरन्ति कर्मफलं सञ्चिन्वन्ति ते भरताः यजमानाः। 'भरतमुद्धर' इति मन्त्रलिङ्गात् यज्ञश्च कण्ठस्थैरेव मन्त्रैः स्तोत्रशस्त्रादिभिर्निर्वर्त्यत इति यज्ञप्रियो मे मन्त्रोच्चारणस्थानं कण्ठं पातु। तदेवं यज्ञादिजन्येन पुण्येन प्राप्तोपासनामार्गो भर्गाख्यं सूत्रमीशं वा क्रममुक्तिद्वारं प्राप्नोतीति श्लोकद्वयतात्पर्यम्॥ १–२॥

स्कंधौ दिव्यायुधः पातु भुजौ भग्नेशकार्मुकः।
करौ सीतापतिः पातु हृदयं जामदग्न्यजित्॥ ३॥

मानुषभावेऽपि ऐश्वरदिव्यायुधानां शार्ङ्गादीनां धारित्वाद्दिव्यायुध आयुधनिधानभूतौ स्कन्धौ मे पातु। तथा भुजबलेनैव भग्नेशकार्मुको भुजौ मे पातु। अत्र ईशकार्मुकं मेरुरूपम्—'रथः क्षोणीयन्ता शतधृतिरगेन्द्रो धनुः' इति त्रिपुरवधे तस्य कार्मुकत्वप्रसिद्धेः। एतेन मानुषभावेऽपि महेश्वरादप्यधिक्यं दर्शितम्। तथा वीर्यशुल्कायाः सीतायाः करग्राही सीतापतिः करौ मे पातु। अनेन नामद्वयेन विश्वामित्रदत्ताया बलाख्याया विद्यायाः फलं शारीरं बलाधिक्यं दर्शितम्। अतिबलायास्तु फलं मनःसङ्कल्पमात्रेण अलौकिकार्थसाधनं, तच्च जामदग्न्यजिदिति ब्राह्मवैष्णवं च तेजो दधानस्य जामदग्न्यस्य तपोराशिवधेन स्पष्टीकृतम्। अतएव हार्दबलवान् हृदयं मे पातु तादृशबलप्रदानेनेति भावः। एवं तृतीयं पारमेश्वरं रूपं ब्रह्मविष्णुशिवेभ्योऽप्यधिकं मानुषभावेऽपीति तृतीयश्लोकेन 'गायत्रीस्थदेवस्येति' पदस्यार्थो दर्शितः॥ ३॥

मध्यं पातु खरध्वंसी नाभिं जाम्बवदाश्रयः।
सुग्रीवेशः कटिं पातु सक्थिनी हनुमत्प्रभुः॥ ४॥

तस्यैव चतुर्धा भजनमाह मध्यमिति। खरादीनां द्वेषपूर्वकं रामं ध्यायतामध्याय्यपेक्षया श्रेष्ठत्वाद्भक्त्याद्यभावाच्च मध्यमत्वं; तेषु निग्रहमुखो रामानुग्रहः सोऽपि मध्यमः। अतस्तत्कर्ता खरध्वंसी मध्यं नाभिना समसूत्रं पृष्ठप्रदेशं मे पातु। जाम्बवत आपत्काले स्वार्थमेव कामपूर्वकं ध्यायतो द्वेषांशाभावात् ततोऽप्यान्तरत्वम्; अतो जाम्बवदाश्रयो मे नाभिं मध्यादाभ्यन्तरं पातु। सुग्रीवस्य तु 'देहि मे', 'ददामि ते' इति न्यायेन, पूर्वं स्वार्थसम्पत्तिः, पश्चादाराधनम्— इति वणिग्वद् भजतो जाम्बवदपेक्षया किञ्चिदूनत्वम्। अतः सुग्रीवेशो बाह्यं मे कटिं पातु। हनुमतस्तु केवलं निष्काममीश्वरार्थमेव भजतः, अन्तरङ्गत्वाच्छिशुवत् प्रियत्वेनाङ्कमारोपयितुं योग्यत्वात् हनुमत्प्रियो मे सक्थिनी अङ्कदेशं पातु। एवं व्यक्तस्य देवस्य चतुर्विधं ध्यानं चतुर्विधभक्तकृतं चतुर्थश्लोकेन दर्शितम्॥ ४॥

जानुनी सेतुकृत्पातु जंघे दशमुखान्तकः।
पादौ विभीषणश्रीदः पातु रामोऽखिलं वपुः॥ ५॥

अथ व्यक्तपरित्यागेनाव्यक्तालम्बनाया गतेः संसारसमुद्रसेतुरूपायाः प्रदाता सेतुकृत् जानुनी शिशोः प्रथमगतिसाधने मे पातु। अनेन स्थूलादेहातिक्रम उक्तः। अस्यामवस्थायां ध्यायी विदेह इत्युच्यते। तथा दशेन्द्रियाणि मुखानि भोगद्वाराणि यस्य स दशमुखो लिङ्गात्मा, तस्यान्तको नाशकः प्रतिवलापयिता दशमुखान्तकः। ईषद्दृढाङ्गस्य शिशोः मन्दोर्ध्वगतिसाधने जङ्घे मे पातु। एतेन लिङ्गदेहातिक्रम उक्तः। अस्यामवस्थायां ध्यायी प्रकृतिलय इत्युच्यते। तथा विगतं भीषणं भयङ्करमज्ञानं यस्य स विभीषणो निरस्ताविद्यः; तस्मै श्रीः—'एषाऽस्य परमा सम्पत्'—इति श्रुतिप्रसिद्ध आनन्दः। तस्याः प्रदाता विभीषणश्रीदो निघृष्टलतया शीघ्रगतिहेतू पादौ मे पातु। एतेनानर्थवृत्तिपूर्विका आनन्दावाप्तिरुक्ता। अस्यामवस्थायां ध्यायी मुक्त इत्युच्यते। रामः सर्वेश्वरतया ब्रह्माण्डमण्डपे रमणशीलो मम जीवन्मुक्तभावं कामयमानस्याखिलं वपुस्त्रिविधमपि शरीरं पातु, समस्तयोगप्रतिपक्षनिरासेन ब्रह्मसाक्षात्कारक्षमं करोत्वित्यर्थः। तदेवं ब्रह्मणि राघवपदेनाध्यारोपितस्य प्रपञ्चस्य दशरथात्मजादिपदत्रयेनापोदितस्याधिष्ठानं प्राप्तुं, ध्यानालम्बभूतं भगवतः समष्टिरूपं व्यष्टिरूपञ्च द्वाभ्यां श्लोकाभ्यां प्रदर्श्य, व्यष्ट्युपासनां चतुर्थेन, समष्ट्युपासनां पञ्चमार्धेन च प्रदर्श्य शेषेणानर्थनिवृत्त्यानन्दावाप्ती जीवन्मुक्तिसहिते निरूपिते— इत्यत्रैव कृत्स्नः शास्त्रार्थोऽस्तीति प्रदर्शनेन रामायणद्रुमाङ्कुरस्य रामकवचस्य गायत्रीबीजत्वमुपपादितम्। यथात्र कथांशः स्पष्टं सूच्यते, अध्यात्मांशस्तु परोक्षवृत्त्या गम्यते। एवं रामायणे तन्मूलभूते वेदे च तदुभयं ज्ञेयम्॥ ५॥